न्तरम् । अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः । मीमांसा न्यायविद्याश्च प्रमाणाष्टकसंयुताः । वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः । मनसा पूर्वसृष्टा वै जाता यत्तेन मानसाः । मरीचिरभवत् पूर्वं ततोऽत्रिर्भगवान् ऋषिः । अङ्गिराश्चाभवत्पश्चात् पुलस्त्यस्तदनन्तरम् । ततः पुलहनामा वै ततः क्रतुरजायत । प्रचेताश्च ततः पुत्त्रो वशिष्ठश्चाभवत् पुनः । पुत्त्रो भृगुरभूत्तद्वन्नारदोऽप्यचिरादभूत् । दशेमान् मानसान् ब्रह्मा मुनीन् पुत्त्रानजीजनत् । शारीरानथ वक्ष्यामि मातृहीनान् प्रजापतेः । अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत । धर्म्मः स्तनान्तादभवत् हृदयात् कुसुमायुधः । भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः । बुद्धेर्मोहः समभवदहङ्कारादभून्मदः । प्रमोदश्चाभवत् कण्ठान्मृत्युर्लोचनतो नृप ! । भरतः करमध्यात्तु ब्रह्मसूनुरभूत्ततः । एते नव ! सुता राजन् ! कन्या च दशमी पुनः । अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता । मनुरुवाच "बुद्धेर्मोहः समभवदिति यत्परिकीर्त्तितम् । अहङ्कारः स्मृतः क्रोधो बुद्धिर्नाम किमुच्यते" । मत्स्य उवाच "सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् । साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता । केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः । एतदेव प्रजासृष्टिं करोति विकरोति च । गुणेभ्यः क्षोभमाणेभ्यस्त्रयो देवा विजज्ञिरे । एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः । सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते । महानिति यतः ख्यातिर्लोकानां जायते सदा । अहङ्कारश्च महतो जायते मानवर्द्धनः । इन्द्रियाणि ततः पञ्च वक्ष्ये बुद्धिवशानि तु । प्रादुर्भवन्ति चान्यानि तथा कर्म्मवशानि तु । श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका च यथाक्रमम् । पायूपस्थं हस्तपादं वाक् चेतीन्द्रियसंग्रहः । शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः । उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः । मन एकादशं तेषां कर्म्मबुद्धिगुणान्वितम् । इन्द्रियावयवाः सूक्ष्मास्तस्य मूर्त्तिं मनीषिणः । श्रयन्ति यस्मात्तन्मात्राः शरीरं तेन संस्मृतम् । शरीरयोगाज्जीवोऽपि शरीरी गद्यते बुधैः । मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया । आकाशं शब्दतन्मात्रादभूच्छब्दगुणात्मकम् । आकाशविकृतेर्वायुः शब्दस्पर्शगुणोऽभवत् । वायोश्च स्पर्शतन्मात्रात्तेजश्चाविरभूत्ततः । त्रिगुणं तद्विकारेण तच्छब्दस्पर्शरूपवत् । तेजो विकाराद्भवद्वारि राजंश्चतुर्गुणम् । रसतन्मात्रसम्भूतं प्रायो रसगुणात्मकम् । भूमिस्तु गन्धतन्मात्रादभूत् पञ्चगुणान्विता । प्रायो गन्धगुणा सा तु बुद्धिरेषा गरीयसी । एभिः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः । ईश्वरेच्छावशः सोऽपि जीवात्मा कथ्यते बुधैः । एवं षड्विंशकं प्रोक्तं शरीर इह मानवे । सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते । एतत्तत्त्वात्मकं कृत्वा जगद्वेधा अजीजनत् । सावित्रीं लोकसृष्ट्यर्थं हृदि कृत्वा समास्थितः । ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् । स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् । शतरूपा च सा ख्याता सावित्री च निगद्यते । सरस्वत्यथ गायत्री ब्रह्माणी च परन्तप ! । ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् । दृष्ट्वा तां व्यथितस्तावत्कामबाणार्द्दितो विभुः । अहो रूपमहो रूपमिति चाह प्रजापतिः । ततो वशिष्ठप्रमुखाः भगिनीमिति चुक्रुशुः । ब्रह्मा न किञ्चिद्ददृशे तन्मुखालोकनादृते । अहो रूपमहो रूपमिति प्राह पुनः पुनः । ततः प्रणामनम्रान्तां पुनरेवाभ्यलोकयत् । अथ प्रदक्षिणं चक्रे सा पितुर्वरवर्णिनी । पुत्त्रेभ्यो लज्जितस्यास्य तद्रूपालोकनेच्छया । आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् । विस्मयस्फुरदोष्ठञ्च पाश्चात्यमुदगात्ततः । चतुर्थमभवत्पश्चाद्वामं कामशरातुरम् । ततोऽन्यदभवत्तस्य कामातुरतया तथा । उत्पतन्त्यास्तदाकाश आलोकनकुतूहलात् । सृष्ट्यर्थं यत् कृतं तेन तपः परमदारुणम् । तत्सर्वं नाशमगमत् स्वसुतोपगमेच्छया । तेनोर्द्ध्वं वक्त्रमभवत्पञ्चमं तस्य धीमतः । आविर्भवज्जटाभिश्च तद्वक्त्रञ्चावृणोत् प्रभुः । ततस्तानब्रवीत् ब्रह्मा पुत्त्रानात्मसमुद्भवान् । प्रजाः सृजध्वमभितः सदेवासुरमानुषीः । एवमुक्तास्ततः सर्वे ससृजुर्विविधाः प्रजाः । गतेषु तेषु सृष्ट्यर्थं प्रणामावनतामिमाम् । उपयेमे स विश्वात्मा शतरूपामनिन्दिताम् । सम्बभूव तया सार्द्धमतिकामातुरो विभुः । सलज्जां चकमे देवः कमलोदरमन्दिरे । यावदब्दशतं दिव्यं यथान्यः प्राकृतो जनः । ततः कालेन महता तस्याः पुत्त्रोऽभवन्मनुः । स्वायम्भुव इति ख्यातः स विराडिति नः श्रुतम् । स तु तद्रूपसामान्यादधिपूरुष उच्यते । वैराजा यत्र ते जाता बहवः शंसितव्रताः । स्वायम्भुवा महाभागाः सप्त सप्त तथा परे । स्वारोचिषाद्याः सर्व्वे ते ब्रह्मतुल्यस्वरूपिणः । औत्तमिप्रमुखा-